भाग्यसंक्रान्तिमुत्तमाम् । शृणु नारद ! यत्नेन धनैश्वर्य्यप्रदायिनीम् । अयने विषुवे युक्ते व्यतीपातेन भानुना । संक्रान्तिदिवसे कुर्य्यादेकभक्तं विमत्सरः । पूर्ववल्लानुमभ्यर्च्य तथा चैव सुवासिने । सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मं सयोषिते । विप्राय वेदविदुषे भक्त्या तत् प्रतिपादयेत् । एवं संवत्सरे पूर्णे कृत्वा ब्राह्मणभोजनम् । पर्वतं लवणं कृत्वा यथाविभवसारतः । काञ्चनं कमलं कृत्वा भास्करञ्चैव कारयेत् । गन्धपुष्पादिना पूज्य विप्राय प्रतिपादयेत्” ।

सौभाग्यावाप्तिव्रतं विष्णुधर्मोत्तरे “माघ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात् । पटे वा यदि वार्च्चायां कृष्णं संपूजयेत् सदा । पूर्वोक्तं सकलं कुर्य्याद् विधिं चात्र नराधिप !” । पूर्वोक्तमिति चैत्रमाससम्बन्धिरूपावाप्तिव्रतोक्तमित्यर्थः । “नित्यं समाचरेत् स्नानं तथा गन्धप्रियङ्गुणा । चरुं प्रियङ्गुणा कुर्य्याद्धोमं कुर्य्यात् प्रियङ्गुणा” । प्रियङ्गुः कङ्गुसदृशगन्धद्रव्यम् “फाल्गुन्यान्तु ततो दद्यात् त्रिरात्रोपोषितो नरः । वस्त्रे च देये नृप ! कुङ्कुमाक्ते चौद्रस्य पात्रञ्च तथैव कांस्यम् । सौभाग्यदं ह्येतदनुत्तमन्तु व्रतं मयैतत्कथितं नृवीर ।” ।

सौरनक्तव्रतं नृसिंहपु० “हस्तयुक्ते वार्कदिने सौरनक्तव्रतं चरेत् । स्नात्वाभ्यर्च्च्य तु विप्रान् वै विरोगो जायते नरः” ।

सौरसप्तमीव्रतं पद्मपु० “यस्तोपवासी सप्तम्यां समान्ते हेमपङ्कजम् । गास्चैव शक्तितोदद्याद्धोमान्ते घटसंयुताः । एतत् सौरव्रतं नाम सूर्य्यलोकप्रदायकम्” ।

स्त्रीपुत्रकामावाप्तिव्रतं भविष्यपु० “एकभक्तेन या नारी कार्त्तिकन्तु क्षपेन्नृप ! । क्षमाहिंसादिनियमैः सञ्जाता ब्रह्मचारिणी । गुडान्नमिश्रं शाल्यन्नं भास्कराय निवेदयेत् । पुष्पाणि करवीराणि गुग्गुलं साज्यमादरात् । सप्तम्याञ्चाथ षष्ठ्यां वा उपवासरतिर्भवेत् । पक्षयोरुभयोरेव श्रद्धया परयान्वितः । इन्द्रनीलप्रतीकाशैर्विमानैः सार्वकामिकैः । नारी युगशतं साग्रं सूर्य्यलोके महीयते” वर्षसाध्यमिदम् ।

स्नेहव्रतं पद्मपु० “आषाढादिचतुर्मासानभ्यङ्गं वर्जयेन्नरः । पारिते च पुनर्दद्यात्तिलतैलयुतं घटम् । भोजनं पायसाज्यञ्च स याति भवनं विभोः । लोकप्रीतिकरं ह्येतत् स्नेहव्रतमिहोच्यते” ।

हयपञ्चमीव्रतं शालिहोत्रे “अम्बराडम्बृताज्जातो वातरंहा मनोजवः । उच्चैःश्रवाः पूजनीयस्तत्र शुक्लस्य पञ्चमी । तत्रैव पूज्या गन्धर्वास्तुरङ्गाणान्तु बान्धवाः । पत्रवाणधराः केचित् केचित् पत्रैश्च संयुताः । भीमश्चित्ररथश्चैव विख्यातः सर्वविदयम् । तथा शालिशिराः श्रीमान् प्रद्युम्नश्च महायशाः । नारदश्च कलिन्दश्च गन्धर्वश्च हाहा हूहूः । तुवाङ्कस्तुम्बुरुश्चैव तथा चित्ररथः प्रभुः । चित्राङ्गदश्च विख्यातश्चित्रसेनश्च वीर्य्यवान् । सिद्धपूर्णश्च वदरी मणांशश्च महायशाः । ब्रह्मचारी रतिगुणः सुपर्णोऽतिबलस्तथा । विश्वावसुः सुरेन्द्रश्च गन्धर्वोऽतिपराक्रमः । इत्येते पूजनीयाः स्युर्गीतैरुच्चावचैः शुभैः । मोदकैः पोलिकाभिश्च परमान्नेन चाक्षतैः । दध्ना गुडेन पयसा शालिपिष्टेन भूरिशः । धूपैर्माल्यैस्तथा दीपैर्द्विजानां स्वस्तिवाचनैः । एवं हि पूजिताः सम्यक् तुरगाणां हि बान्धवाः । बलमायुः प्रयच्छन्ति संग्रामेष्वपराजयम् । आरोग्यं परमां पुष्टिस्तथैव च विधीयते” ।

हरतृतीयाव्रतं स्कन्दपु० “माघे शुक्लतृतीयायामुपवासन्तु कारयेत् । रात्रौ सम्भारमाहृत्य गौरीयागस्य मण्डपे । अथ पत्रं लिखेत् पद्मं मण्डपे मुनिपुङ्गव ! । उमामहेश्वरं तत्र पूजयेत् सुसमाहितः । पूर्वपत्रे न्यसेद् गौरीमाग्नेय्यां ललितां न्यसेत् । दक्षिणे तु उमां नाम नैरृत्यां च स्वधां तथा । पश्चिमे वामदेवीन्तु वायव्यां मूलगौरिकाम् । उत्तरे तु सुभगान्तु ऐशान्यां गिरिजां तथा । उमामहेश्वरं मध्ये गन्धपुष्पैः प्रपूजयेत् । भृङ्गारञ्चैव संस्थाप्य तण्डुलैः परिपूरयेत् । एवं कृत्वा विधानेन मुने ! वर्षचतुष्टयम् । आराधनन्तु देव्याश्च सौभाग्यजननं परम् । उद्यापनं ततः कुर्य्यात् तस्मिन्नेव ततो दिने । उमामहेश्वरं हैमं स्वच्छन्दे मञ्चके स्थितम् । वस्त्रैर्गन्धैश्च धूपैश्च दीपमालादिभिस्तथा । भक्ष्यैर्नानाविधैः सम्यक् पूज्य भक्त्या ततो मुने ! । तद्वद्गुरुं सभार्य्यञ्च पूजयेत् द्विजसत्तमम् । गाञ्चैव गुरवे तद्वत् वस्त्रालङ्कारसंयुताम् । मिथुनानीह चत्वारि भोजयेत् सुसमाहितः । उमामहेश्वरं हैमं दत्त्वा भक्त्या क्षमापयेत्” ।

हरव्रतं भविष्यपु० “अष्टम्यां पूजितो देवी गोमुक्ताभरणो हरः । ज्ञानं ददाति विपुलां कान्तिं जातिं बलं तथा” । गोमुक्ताभरणः चक्षुःश्रवोभूषः शिव इत्यर्थः । “[illegible] ज्ञानदश्चैव पापघ्नाः च प्रपूजितः । मूलमन्त्रः स्वशाखि-